कपोतो धवलः पाण्डुः शतपत्त्रो हरिच्छुकः ।
प्रतुदा मधुराः पित्तकफघ्नास्तु वरा हिमाः ।
लघवो बद्धवर्च्चस्काः किञ्चिद्वातकराः स्मृताः ॥'
अथ प्रसहानां गणना गुणाश्च ।
'काको गृध्र उलूकश्च चिल्लश्च शशघातकः ।
चाषो भासश्च कुरर इत्याद्याः प्रसहाः स्मृताः ।
प्रसहाः कीर्त्तिता एते प्रसह्याच्छिद्य भक्षणात् ।
प्रसहाः खलु वीर्य्योष्णाः यन्मांसं भक्षयन्ति ये ।
ते शोषभस्मकोन्मादैः शुक्रक्षीणा भवन्ति हि ॥'
शशघातकस्थाने शतघातकोऽपि पाठः । बाज इति लोके ॥*॥ अथ ग्राम्याणां गणना गुणाश्च ।
'छागमेषवृषाश्वाद्या ग्राम्याः प्रोक्ता महर्षिभिः ।
ग्राम्या वातहराः सर्व्वे दीपनाः कफपित्तलाः ।
मधुरा रसपाकाभ्यां वृंहणा बलवर्द्धनाः ॥'
अथ कूलेचराणां गणना गुणाश्च ।
'लुलायगण्डवाराहचमरीवारणादयः ।
एते कूलेचराः प्रोक्ता यतः कूले चरन्त्यमी ॥
कूलेचरा मरुत्पित्तहरा वृष्या बलावहाः ।
मधुराः शीतलाः स्निग्धा मूत्रलाः श्लेष्मवर्द्धनाः ॥'
अथ प्लवानां गणना गुणाश्च ।
'हंससारसकाचाक्षवकक्रौञ्चसरारिकाः ।
नन्दीमुखी सकादम्बा बलाकाद्याः प्लवाः स्मृताः ।
प्लवन्ते सलिले यस्मादेते तस्मात् प्लवाः स्मृताः ॥
स्थूला कठोरा वृत्ता च यस्याश्चञ्चूपरिस्थिता ।
गुटिका चक्षुसदृशी ज्ञेया नन्दीमुखीति सा ॥
प्लवाः पित्तहराः स्निग्धा मधुरा गुरवो हिमाः ।
वातश्लेष्मप्रदाश्चापि बलशुक्रकराः सराः ॥'
अथ कोषस्थानां गणना गुणाश्च ।
'शङ्खः शङ्खनखश्चापि शुक्तिशम्बूककर्कटाः ।
जीवा एवम्विधाश्चान्ये कोषस्थाः परिकीर्त्तिताः ॥
कोषस्था मधुराः स्निग्धाः पित्तवातहरा हिमाः ।
वृंहणा बहुवर्च्चस्का वृष्याश्च बलवर्द्धनाः ॥'
अथ पादिनां गणना गुणाश्च ।
'कुम्भीरकूर्म्मनक्राश्च गोधामकरशङ्कराः ।
घण्टिकः शिशुमारश्चेत्यादयः पादिनः स्मृताः ॥
पादिनोऽपि च ये ते तु कोषस्थानां गुणैः समाः ॥'
इति भावप्रकाशः ॥

अन्यच्च ।
मांसं वातहरं वृष्यं वृंहणं बलवर्द्धनम् ।
प्रीणनं गुरु हृद्यञ्च मधुरं रसपाकयोः ॥'
तस्योत्पत्तिस्थानमष्टविधं यथा,—
'प्रसह्य भक्षयन्त्येते प्रसहास्तेन कीर्त्तिताः ।
भूशया बिलशायित्वादानूपोऽनूपसंश्रयात् ॥
जले निवासाज्जलजा जले चर्य्याज्जलेचराः ।
स्थलजा जाङ्गलाः प्रोक्ता मृगा जङ्गलचारिणः ॥
विकीर्य्य विष्किराश्चैव प्रतुद्य प्रतुदास्तथा ।
योनिरष्टविधा ज्ञेया मांसानां संप्रकीर्त्तिता ॥'
'प्रसहा भूशयानूपवारिजा वारिचारिणः ।
गुरूष्णमधुराः स्निग्धा वातघ्नाः शुक्रवर्द्धनाः ॥
लावाद्यो वैष्किरो वर्गः प्रतुदा जाङ्गला मृगाः ।
लघवः शीतमधुराः सकषाया हिता नृणाम् ॥'
अथ मांसयूषगुणाः ।

'रसो मांसस्य चक्षुष्यो वृंहणः प्राणवर्द्धनः ।
वृष्यो वातविकारघ्नः स्मृत्योजःस्वरवर्द्धनः ।
भग्नविश्लिष्टसन्धीनां क्षतानां क्षयिणां हितः ॥'
अथ तैलपक्वमांसगुणाः ।
'मांसं यत्तैलसंसिद्धं वीर्य्योष्णं पित्तलं कटु ।
अग्निसन्दीपनं रुच्यं दृष्टिनुत् पुष्टिनुद्गुरु ॥'
घृतपक्वमांसगुणाः ।
'मांसन्तु घृतसंसिद्धं हृदिदं पुष्टिनुल्लघु ।
प्रीणनं सर्व्वधातूनां विशेषान्मुखशोषिणाम् ॥'
परिशुष्कप्रदिग्धमांसयोर्लक्षणं गुणाश्च ।
मांसं बहुघृते भृष्टं सिक्तं चोष्णाम्बुना मुहुः ।
जीरकाद्यैः समायुक्तं परिशुष्कं तदुच्यते ॥
परिशुष्कं स्थिरं स्निग्धं हर्षणं प्रीणनं गुरु ।
पित्तघ्नं बलमेधाग्निमांसौजःशुक्रवर्द्धनम् ॥
तदेव घनतक्राढ्यं प्रदिग्धं सन्निशातकम् ।
प्रदिग्धं बलमांसाग्निवर्द्धनं श्वासपित्तजित् ॥'
शूलिकापक्वमांसगुणाः ।
'मांसन्तु शूलिकाप्रोतमङ्गारेण विपाचितम् ।
ज्ञेयं गुरुतरं वृष्यं दीप्ताग्नीनां सदा हितम् ॥'
वेशवारमांसस्य लक्षणं गुणाश्च ।
'निरस्थि पिशितं पिष्टं स्विन्नं गुड़घृतान्वितम् ।
कणामरिचसंयुक्तं वेशवार इति स्मृतम् ॥
वेशवारो गुरुः स्निग्धो बलोपचयवर्द्धनः ।
द्रव्येण येन येनेह यच्चनं मत्स्यमांसयोः ।
तस्य तस्य तयोश्चैतद्गुणदोषैर्व्विभावयेत् ॥'
एकत्र सर्व्वमांसभक्षणदोषो यथा,—
'एकत्र सर्व्वमांसानि विरुध्यन्ते परस्परम् ॥'
मांसस्य गुरुत्वं यथा,—
'अन्नादष्टगुणं पिष्टं पिष्टादष्टगुणं पयः ।
पयसोऽष्टगुणं मांसं मांसादष्टगुणं घृतम् ।
घृतादष्टगुणं तैलं मर्द्दनान्न च भक्षणात् ॥'
इति राजवल्लभः ॥

वर्ज्जनीयमांसानि यथा,—
'क्रव्यादपक्षिदात्यूहशुकमांसानि वर्जयेत् ।
सारसैकशफान् हंसान् बलाकावकटिट्टिभान् ॥
कुररं जालपादञ्च खञ्जरीटमृगद्विजान् ।
चाषान् मात्स्यान् रक्तपादान् जग्ध्वा वै
कामतो नरः ॥
वश्रुरं कामतो जग्ध्वा सोपवासस्त्र्यहं वसेत् ।'
इति गारुडे ९६ अध्यायः ॥
मांसभक्षणे दोषो यथा,—
'लोभात् स्वभक्षणार्थाय जीविनं हन्ति यो नरः ।
मज्जाकुण्डे वसेत् सोऽपि तल्लोमी लक्षवर्षकम् ॥
ततो भवेत् स शशको मीनश्च सप्तजन्मसु ।
वराहश्च कर्म्मभ्यस्ततः शुद्धिं लभेद्ध्रुवम् ॥'
इति ब्रह्मवैवर्त्ते प्रकृतिखण्डे २७ अध्यायः ॥
अपि च ।
'बलाकं हंसदात्यूहं कलविङ्कं शुकं तथा ।
कुररञ्च चकोरञ्च जालपादञ्च कोकिलम् ॥
चाषञ्च खञ्जरीटञ्च श्येनं गृध्रं तथैव च ।
उलूकं चक्रवाकञ्च भासं पारावतन्तथा ।
कपोतं टिट्टिभञ्चैव ग्रामटिट्टिभमेव च ।

सिंहव्याघ्रञ्च मार्ज्जारं श्वानं शूकरमेव च ॥
शृगालं मर्कटञ्चैव गर्द्दभञ्च न भक्षयेत् ।
न भक्षयेत् सर्व्वमृगान् पक्षिणोऽन्यान् वने-
चरान् ॥
जलेचरान् स्थलेचरान् प्राणिनश्चेति धारणा ॥'
इति कूर्म्मपुराणे उपविभागे १६ अध्यायः ॥
अन्यच्च ।
'नाद्यादविधिना मांसं विधिज्ञो नापदि द्विजः ।
जग्ध्वा ह्यविधिना मांसं प्रेत्य तैरद्यतेऽवशः ॥
न तादृशं भवत्येनो मृगहन्तुर्धनार्थिनः ।
यादृशं भवति प्रेत्य वृथामांसानि खादतः ॥
कुर्य्याद्घृतपशुं सङ्गे कुर्य्यात् पिष्टपशुं तथा ।
न त्वेव तु वृथा हन्तुं पशुमिच्छेत् कदाचन ॥
यावन्ति पशुरोमाणि तावत्कृत्वो ह मारणम् ।
वृथापशुघ्नः प्राप्नोति प्रेत्य जन्मनि जन्मनि ॥
नाकृत्वा प्राणिनां हिंसां मांसमुत्पद्यते क्वचित् ।
न च प्राणिवधः स्वर्ग्यस्तस्मान्मांसं विवर्ज्जयेत् ॥
समुत्पत्तिञ्च मांसस्य वधबन्धौ च देहिनाम् ।
प्रसमीक्ष्य निवर्त्तेत सर्व्वमांसस्य भक्षणात् ॥
न भक्षयति यो मांसं विधिं हित्वा पिशाचवत् ।
स लोकप्रियतां याति व्याधिभिश्च न पीड्यते ॥
स्वमांसं परमांसेन यो वर्द्धयितुमिच्छति ।
अनभ्यर्च्य पितॄन् देवान् ततोऽन्यो नास्त्य-
पुण्यकृत् ॥
वर्षे वर्षेऽश्वमेधेन यो यजेत शतं समाः ।
मांसानि च न खादेद्यस्तयोः पुण्यफलं समम् ॥
फलमूलाशनैर्मेध्यैर्मुन्यन्नानाञ्च भोजनैः ।
न तत्फलमवाप्नोति यन्मांसपरिवर्ज्जनात् ॥
मांसभक्षयितामुत्र यस्य मांसमिहाद्म्यहम् ।
एतन्मांसस्य मांसत्वं प्रवदन्ति मनीषिणः ॥
यो यस्य मांसमश्नाति स तन्मांसाद उच्यते ।
मत्स्यादः सर्व्वमांसादस्तस्मान्मत्स्यान् विव-
र्ज्जयेत् ॥'
इति मानवे ५ अध्यायः ॥
अन्यच्च । श्रीभागवतपञ्चमस्कन्धगद्यम् । 'ये त्विह वै पुरुषाः पुरुषमेधेन यजन्ते । याश्च स्त्रियो नृपशून् खादन्ति तांश्च ताश्च ते पशवो इह निहता यमसदने यातयन्तो रक्षोगणाः । शौनिका इव सुधितिना वदायासृक् पिबन्तीति ॥'
ब्रह्मपुराणम् ।
'पशोस्तु मार्य्यमाणस्य न मांसं ग्राहयेत् क्वचित् ।
पृष्ठमांसं गर्भशय्यां शुष्कमांसमथापि वा ॥'
महाभारतम् ।
'रोगार्त्तोऽभ्यर्थितो वापि यो मांसं नात्त्य-
लोलुपः ।
फलमाप्नोत्ययत्नेन सोऽश्वमेधशतस्य च ॥'
नन्दिपुराणम् ।
'यश्चोपदेशं कुरुते परस्य तु महात्मनः ।
मांसस्य वर्ज्जनफलं सोऽमांसादफलं लभेत् ॥'
भविष्यपुराणम् ।
'आमिषं रक्तशाकञ्च यो भुङ्क्ते च रवेर्द्दिने
सप्तजन्म भवेत् कुष्ठी दरिद्रश्चोपजायते ॥'